CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

फ
११४

❀ ॐ

श्री शिव अष्टोत्तरशत नाम

व

श्री शिव सहस्रनाम

सम्पादक

रामनिरञ्जन ब्रह्मचारी
विष्णुघाट, हरिद्वार, यू० पी०।

सम्वत् १९९५

मूल्य—सप्रेम पाठ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

फ्र
२१४

अथ श्री शिव अष्टोत्तर शतनाम
व

श्री शिव सहस्रनाम ।

अथ करन्यासः ॥

ॐ अस्य श्री शिवनामाष्टोत्तरशतस्य शुक्र ऋषिः
श्री शिव सहस्रनाम्नो विष्णु ऋषिः

अनुष्टुप् छन्दः श्री शङ्करो देवता संहर्ता वीजम्
उमा शक्तिः स्कन्दः कीलकम् ।

ॐ महादेवाय अंगुष्ठाभ्यां नमः ॥ ॐ पिनाकिने तर्जनीभ्यां नमः ॥ ॐ कामारये मध्यमाभ्यां नमः ॥ ॐ चण्डीशाय कनिष्ठिकाभ्यां नमः ॥ ॐ कपर्दिने करतल-करपृष्ठाभ्यां नमः ॥ इति करन्यासः ॥

अथ हृदयादिन्यासः ॥ वृषभाक्षं महाज्ञेयं पुरुषं सर्व-कामदमिति हृदयाय नमः ॥ कामारिं कामदहनं कामरूपं कपर्दिनमिति शिरसे स्वाहा ॥ भूतेश्वरं भूतनाथं पञ्चभूता-श्रितं खगमिति शिखायै वषट् ॥ मृत्योर्मृत्युं महासेनं

ॐ अघोराय अनामिकाभ्यां नमः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्मशानारण्यवासिनमिति कवचाय हुम् । रागं विरागं रागान्धं वीतरागं शतार्चिषमिति नेत्रत्रयाय वौषट् ॥ यज्ञं यज्ञपतिरुद्रमीशानं वरदं शिवमिति अस्त्राय फट् ॥ श्रीचन्द्रशेखर प्रीत्यर्थे पाठे विनियोगः ॥

अथ ध्यानम् ।

ध्यायेन्नित्यं महेशं रजतगिरिनिभंचारुचन्द्रावतंसम् ।
रत्नाकल्पोज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नम् ॥
पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानम् ।
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्री १०८ ईश्वर मठ
पुस्तकालय,
मुमुक्षु भवन, वाराणसी

॥ अथ श्री शिव अष्टोत्तर शतनाम ॥

ॐ नमः शिवाय ॥

महादेवं विरुपाक्षं चन्द्रार्द्धकृतशेखरम् ।
अमृतं शास्वतं स्थाणुं नीलकण्ठं पिनाकिनम् ॥८॥

वृषभाक्षं महाज्ञेयं पुरुषं सर्वकामदम् ।
कामारिं कामदहनं कामरूपं कपर्द्दिनम् ॥१६॥

विरूपं गिरिशं भीमं स्रग्विणं रक्तवाससम् ।
योगिनं कालदहनं त्रिपुरघ्नं कपालिनम् ॥२५॥

गूढव्रतं गुप्तमन्त्रं गम्भीरं भावगोचरम् ।
अणिमादिगुणाधारं त्रिलोक्यैश्वर्यदायकम् ॥३१॥

वीरं वीरहनं घोरं विरूपं मांसलं पटुम् ।
महामांसादमुन्मत्तं भैरवं वै महेश्वरम् ॥४१॥

त्रैलोक्यद्रावणं लुब्धं लुब्धकम् यज्ञसूदनम् ।
कृत्तिकानांसुतैर्युक्तमुन्मत्तं कृत्तिवाससम् ॥४८॥

गजकृत्तिपरिधानं क्षुब्धं भुजगभूषणम् ।
दक्षालम्बं च वेतालं घोरं शाकिनिपूजितम् ॥५५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अघोरं घोरदैत्यघ्नं घोरघोषं वनस्पतिम् ।
भस्मांगं जटिलं शुद्धं भेरुण्डशतसेवितम् ॥६३॥

भूतेश्वरं भूतनाथं पञ्चभूताश्रितं खगम् ।
क्रोधिनं निष्ठुरं चण्डं चण्डीशं चण्डिकाप्रियम् ॥७२

चण्डं तुंगं गरुत्मंतं नित्यमासवभोजनम् ।
लेलिहानं महारौद्रं मृत्युं मृत्योरगोचरम् ॥८०॥

मृत्योर्मृत्युं महासेनं श्मशानारण्य वासिनम् ।
रागं विरागं रागान्धं वीतरागं शतार्चिषम् ॥८८॥

सत्त्वं रजस्तमो धर्म्ममधर्म्मं वासवानुजम् ।
सत्यं त्वसत्यं सद्रूपमसद्रूपमहेतुकम् ॥९९॥

अर्द्धनारीश्वरं भानुं भानुकोटि शतप्रभम् ।
यज्ञं यज्ञपतिं रुद्रमीशानं वरदं शिवम् ॥१०८॥

———

यस्त्रिसंध्यपठेच्छंभोनाम्नामष्टोत्तरं शतम् ।
शतरुद्रजयावृत्त्या यत्फलं तत्फलं लभेत् ॥

———

इति श्री शिव अष्टोत्तर शतनाम स्तोत्रं सम्पूर्णम् ।
ॐ श्री सदाशिवार्पणमस्तु ।

———

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

❀ ॐ ❀

श्री शिव सहस्रनाम ।

ॐ नमः शिवाय ।

शिवो हरो मृडो रुद्रः पुष्करः पुष्पलोचनः ।
अर्थिगम्यः सदाचारः शर्वः शम्भुर्महेश्वरः ॥११॥

चन्द्रापीडश्चन्द्रमौलि र्विश्वं विश्वामरेश्वरः ।
वेदान्तसारसन्दोहः कपाली नीललोहितः ॥१८॥

ध्यानाधागेऽपरिच्छेद्यो गौरीभर्त्ता गणेश्वरः ।
अष्टमूर्ति र्विश्वमूर्ति स्त्रिवर्गस्वर्गसाधनः ॥२५॥

ज्ञानगम्यो दृढप्रज्ञो देवदेव स्त्रिलोचनः ।
वामदेवो महादेवः पटुः परिवृढो दृढः ॥३४॥

विश्वरूपो विरूपाक्षो वागीशः शुचिसत्तमः ।
सर्वप्रमाणसंवादी वृषाङ्को वृषवाहनः ॥४१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ईशः पिनाकी खट्वांगी चित्रवेषश्चिरंतनः ।
तमोहरो महायोगी गोप्ता ब्रह्मा च धूर्जटिः ॥५१॥

कालकालः कृत्तिवासाः सुभगः प्रणवात्मकः ।
उन्नध्रः पुरूपो जुष्यो दुर्वासाः पुरशासनः ॥६०॥

दिव्यायुधः स्कन्दगुरुः परमेष्टी परात्परः ।
अनादिमध्यनिधनो गिरिशो गिरिजाधवः ॥६७॥

कुवेरबन्धुः श्रीकंठो लोकवर्णोत्तमो मृदुः ।
समाधिवेद्यः कोदंडी नीलकंठः परस्वधीः ॥७५॥

विशालाक्षो मृगव्याधः सुरेशः सूर्यतापनः ।
धर्मधाम क्षमाक्षेत्रं भगवान्भगनेत्रभित् ॥८३॥

उग्रः पशुपतिस्तार्क्ष्यः प्रियभक्तः परंतपः ।
दाता दयाकरो दक्षः कर्मदी कामशासनः ॥९३॥

श्मशाननिलयः सूक्ष्मः श्मशानस्थो महेश्वरः ।
लोककर्त्ता मृगपति र्महाकर्त्ता महोषधिः ॥१०१॥

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
नीतिः सुनीतिः शुद्धात्मा सोमः सोमरतः सुखीः ॥११२

सोमपोऽमृतपः सौम्यो महातेजा महाद्युतिः ।
तेजोमयोऽमृतमयोऽन्नमयश्च सुधापतिः ॥१२१॥

अजातशत्रुरालोकः संभाव्यो हव्यवाहनः ।
लोककरो वेदकरः सूत्रकारः सनातनः ॥१२९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

महर्षिः कपिलाचार्यो विश्वदीप्ति स्त्रिलोचनः ।
पिनाकपाणिर्भूदेवः स्वस्तिदः स्वस्तिकृत्सुधीः ॥१३७॥
धातृधामा धामकरः सर्वगः सर्वगोचरः ।
ब्रह्मसृग्विश्वसृक्सर्गः कर्णिकारः प्रियः कविः ॥१४६॥
शाखो विशाखो गोशाखः शिवोभिषगनुत्तमः ।
गङ्गापुत्रोदको भव्यः पुष्कलः स्थपतिः स्थिरः ॥१५६॥
विजितात्मा विपयात्मा भूतवाहन सारथिः ।
सगणोगणकायश्च सुकीर्त्तिश्छिन्नसंशयः ॥१६३॥
कामदेवः कामपालो भस्मोद्धूलितविग्रहः ।
भस्मप्रियो भस्मशायी कामी कान्तः कृतागमः ॥१७०॥
समावर्तोऽनिवृत्तात्मा धर्मपुंजः सदाशिवः ।
अकल्मषश्चतुर्बाहु दुर्गवासो दुरासदः ॥१७८॥
दुर्लभो दुर्गमो दुर्गः सर्वायुधविशारदः ॥१८२॥
अध्यात्मयोगनिलयः सुतंतुस्तंतुवर्धनः ॥१८५॥
शुभांगो लोकसारंगो जगदीशो जनार्दनः ।
भस्मशुद्धिकरो मेरूरोजस्वी शुद्धविग्रहः ॥१९३॥
असाध्यः साधुसाध्यश्च भृत्यमर्कटरूपधृक् ।
हिरण्यरेताः पौराणो रिपुजीवहरोबलः ॥२००॥
महाह्रदो महागर्त्तः सिद्धवृन्दारवंदितः ।
व्याघ्रचर्माम्बरो व्याली महाभूतो महानिधिः ॥२०७॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अमृतांशोऽमृतवपुः पांचजन्यः प्रभंजनः ॥२११॥
पंचविंशतितत्वस्थः पारिजातः परावरः ॥२१४॥
सुलभः सुव्रतः शूरो ब्रह्म वेदनिधिर्निधिः ।
वर्णाश्रमगुरूवर्णी शत्रुजिच्छत्रुतापनः ॥२२१॥
आश्रमः क्षपणः क्षामो ज्ञानवानचलेश्वरः ।
प्रमाणभूतो दुर्ज्ञेयः सुपर्णो वायुवाहनः ॥२३०॥
धनुर्धरो धनुर्वेदो गुणराशि र्गुणाकरः ।
सत्यः सत्यपरो दीनो धर्मांगो धर्मसाधनः ॥२३५॥
अनंतदृष्टिरानंदो दंडो दमयितादमः ।
अभिवाद्यो महामायो विश्वकर्मा विशारदः ॥२४१॥
वीतरागो विनितात्मा तपस्वी भूतभावनः ।
उन्मत्तवेषः प्रच्छन्नो जितकामोऽजितप्रियः ॥२४८॥
कल्याणप्रकृतिः कल्पः सर्वलोकप्रजापतिः ।
तपस्वी तारको धीमान्प्रधानप्रभुरव्ययः ॥२५६॥
लोकपालोऽन्तर्हितात्मा कल्पादिः कमलेक्षणः ।
वेदशास्त्रार्थतत्त्वज्ञोऽनियमो नियताश्रयः ॥२६३॥
चन्द्रः सूर्य्यः शनिः केतुर्वरांगो विद्रुमच्छविः ।
भक्तिवश्यः परब्रह्म मृगवाणार्पणोऽनघः ॥२७३॥
अद्रिरद्रालयः कांतः परमात्मा जगद्गुरूः ।
सर्वकर्मालयस्तुष्टो मंगल्यो मंगलावृतः ॥२८०॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

महातपाः दीर्घतपाः स्थविष्ठः स्थविरो ध्रुवः ।
अहः संवत्सरो व्याप्तिः प्रमाणं परमं तपः ॥२९१॥

संवत्सरकरो मंत्रप्रत्ययः सर्वदर्शनः ।
अजः सर्वेश्वरः सिद्धो महारेता महाबलः ॥२९९॥

योगी योग्यो महातेजाः सिद्धिः सर्वादिरग्रहः ।
वसुर्वसुमनाः सत्यः सर्वपापहरो हरः ॥३०८॥

सुकीर्तिः शोभनः श्रीमानवाङ्मनसगोचरः ।
अमृतः शाश्वतः शांतो बाणहस्तः प्रतापवान् ॥३१५॥

कमंडलुधरो धन्वी वेदांगो वेदविन्मुनिः ।
आजिष्णुर्भोजनंभोक्ता लोकनाथो दुराधरः ॥३२४॥

अतींद्रियो महामायः सर्ववासश्चतुष्पथः ।
कालयोगी महानादो महोत्साहो महाबलः ॥३३१॥

महाबुद्धि र्महावीर्यो भूतचारी पुरंदरः ।
निशाचरः प्रेतचारी महाशक्ति र्महाद्युतिः ॥३३८॥

अनिर्देश्यवपुः श्रीमान्सर्वाचार्य मनोगतिः ।
बहुश्रुतो महामायो नियतात्मा ध्रुवोऽध्रुवः ॥३४५॥

ओजस्तेजोद्युतिधरो नर्तकः सर्वशासकः ।
नृत्यप्रियो नृत्यनित्यः प्रकाशात्मा प्रकाशकः ॥३५०॥

स्पष्टाक्षरो बुधोमंत्रः समानः सारसंप्लवः ।
युगादिकृद्युगावर्तो गंभीरो वृषवाहनः ॥३५८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इष्टो विशिष्टः शिष्टेष्टः शलभः शरभो धनुः ।
तीर्थरूप स्तीर्थनामा तीर्थादृश्यः स्तुतोऽर्थदः ॥३६
अपांनिधिरधिष्ठानं विजयो जयकालवित् ।
प्रतिष्ठितः प्रमाणज्ञो हिरण्यकवचो हरिः ॥३७७॥
विमोचनः सुरगणो विद्येशो विन्दुसंश्रयः ।
बालरूपो बलोन्मत्तो विकर्ता गहनोगुहः ॥३८६॥
करणं कारणं कर्त्ता सर्वबंधविमोचनः ॥३९०॥
व्यवसायो व्यवस्थानः स्थानदो जगदादिजः ॥३९४॥
गुरूदो ललितोऽभेदो भावात्मात्मनि संस्थितः ।
वीरेश्वरो वीरभद्रो वीरासन विधिर्विराट् ॥४०२॥
वीरचूडामणिर्वेत्ता तीव्रानंदो नदीधरः ।
आज्ञाधार स्त्रिशूली च शिपिविष्टः शिवालयः ॥४१०॥
बालखिल्यो महाचापस्तिग्मांशुर्बधिरः खगः ।
अभिरामः सुशरणः सुब्रह्मण्यः सुधापतिः ॥४१९॥
मघवान्कौशिको गोमान्विरामः सर्वसाधनः ।
ललाटाक्षो विश्वदेहः सारः संसारचक्रभृत् ॥४२७॥
अमोघदंडो मध्यस्थो हिरण्यो ब्रह्मवर्चसी ॥४३१॥
परमार्थः परोमायी शंबरो व्याघ्रलोचनः ॥४३५॥
रुचिर्विरंचिः स्वर्धुर्वाचस्पतिरहर्पतिः ॥४४०॥
रवि र्विरोचनः स्कंधः शास्ता वैवस्वतोयमः ॥४४४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

युक्तिरुन्नतकीर्तिश्च सानुरागः परंजयः ।
कैलासाधिपतिः कांतः सविता रविलोचनः ॥४५१॥
विद्वत्तमोवीतभयो विश्वभर्त्ताऽनिवारितः ।
नित्यो नियतकल्याणः पुण्यश्रवणकीर्त्तनः ॥४५८॥
दूरश्रवा विश्वसहो ध्येयो दुःस्वप्ननाशनः ॥४६२॥
उत्तारणो दुष्कृतिहा विज्ञेयो दुःसहोऽभवः ॥४६७॥
अनादि र्भूर्भुवो लक्ष्मीः किरीटी त्रिदशाधिपः ॥४७१॥
विश्वगोप्ता विश्वकर्त्ता सुवीरो रुचिरांगदः ॥४७५॥
जननो जनजन्मादिः प्रीतिमान्नीतिमान्धवः ॥४८०॥
वशिष्टः कश्यपो भानु र्भीमो भीमपराक्रमः ॥४८५॥
प्रणवः सत्पथाचारो महाकोशो महाधनः ।
जन्माधिपो महादेवः सकलागमपारगः ॥४९२॥
तत्त्वं तत्त्वविदेकात्मा विभुर्विश्वविभूषणः ।
ऋषि र्ब्राह्मणऐश्वर्य जन्ममृत्युजरातिगः ॥५००॥
पंचयज्ञसमुत्पत्ति र्विश्वेशो विमलोदयः ।
आत्मयोनिरनाद्यंतो वत्सलो भक्तलोकधृक् ॥५०७॥
गायत्रीवल्लभः प्रांशुर्विश्वावासः प्रभाकरः ॥५११॥
शिशुर्गिरिरतः सम्राट् सुषेणः सुरशत्रुहा ॥५१५॥
अमोघोऽरिष्टनेमिश्च कुमुदो विगतज्वरः ।
स्वयंज्योतिस्तनुज्योतिरात्मज्योतिरचंचलः ॥५२१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पिंगलः कपिलश्मश्रुर्भालनेत्रस्त्रयीतनुः ।
ज्ञानस्कंदो महानीति विश्वोत्पत्ति रुपप्लवः ॥५२८॥
भगोविवस्वानादित्यो योगपारो दिवस्पतिः ॥५३१॥
कल्याणगुणनामा च पापहा पुण्यदर्शनः ॥५३४॥
उदारकीर्त्ति रुद्योगी सद्योगी सदसन्मयः ।
नक्षत्रमाली नाकेशः स्वाधिष्ठानपदाश्रयः ॥५४१॥
पवित्रः पापहारी च मणिपूरो नभोगतिः ।
हृत्पुंडरीकमासीनः शक्रः शांतो वृषाकपिः ॥५४८॥
उष्णोगृहपतिः कृष्णः समर्थोऽनर्थनाशनः ।
अधर्मशत्रुरज्ञेयः पुरुहूतः पुरुश्रुतः ॥५५६॥
ब्रह्मगर्भो बृहद्गर्भो धर्मधेनु र्धनागमः ॥५६०॥
जगद्धितैषी सुगतः कुमारः कुशलागमः ॥५६४॥
हिरण्यवर्णो ज्योतिष्मान्नानाभूतरतो ध्वनिः ।
अरागो नयनाध्यक्षो विश्वामित्रो धनेश्वरः ॥५७१॥
ब्रह्मज्योतिर्वसुधामा महाज्योतिरनुत्तमः ।
मातामहो मातरिश्वा नभस्वान्नागहारधृक् ॥५७७॥
पुलस्त्यः पुलहोऽगस्त्यो जातूकर्ण्यः पराशरः ॥५८२॥
निरावरणनिर्वारो वैरंच्यो विष्टरश्रवाः ॥५८५॥
आत्मभूरनिरुद्धोऽत्रिर्ज्ञानमूर्ति र्महायशाः ॥५९०॥
लोकवीराग्रणी वीरश्चण्डः सत्यपराक्रमः ॥५९४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्यालाकल्पोमहाकल्पः कल्पवृक्षः कलाधरः ।
अलंकरिष्णुरचलोरोचिष्णुर्विक्रमोन्नतः ॥६०२॥
आयुः शब्दपतिर्वेगी प्लवनः शिखिसारथिः ।
असंसृष्टोऽतिथिः शक्रप्रमाथी पादपासनः ॥६०९॥
वसुश्रवा हव्यवाहः प्रतप्तो विश्वभोजनः ।
जप्यो जरादिशमनो लोहितात्मा तनूनपात् ॥६१६॥
बृहदश्वो नभोयोनिः सुप्रतीकस्तमिस्रहा ।
निदाघस्तपनोमेघः स्वक्षः परपुरञ्जयः ॥६२४॥
सुखानिलः सुनिष्पन्नः सुरभिः शिशिरात्मकः ।
वसंतो माधवो ग्रीष्मो नभस्यो बीजवाहनः ॥६३१॥
अंगिरागुरुरात्रेयो विमलो विश्ववाहनः ।
पावनः सुमतिर्विद्वां स्त्रैविद्यो नरवाहनः ॥६३९॥
मनोबुद्धिरहङ्कारः क्षेत्रज्ञः क्षेत्रपालकः ॥६४३॥
जमदग्निर्बलनिधि र्विंगालो विश्वगालवः ॥६४७॥
अघोरोऽनुत्तरो यज्ञः श्रेयो निःश्रेयसांपथः ।
शैलो गगनकुन्दाभो दानवारिररिंदमः ॥६५६॥
रजनी जनकश्चारु विशल्यो लोककल्पधृक् ।
चतुर्वेदश्चतुर्भाव श्चतुरश्चतुरप्रियः ॥६६२॥
आम्नायोऽथः समाम्नाय स्तीर्थदेव शिवालयः ।
बहुरूपो महारूपः सर्वरूपश्चराचरः ॥६६९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्याय निर्मायको न्यायी न्यायगम्यो निरन्तरः ।
सहस्रमूर्द्धा देवेन्द्रः सर्वशस्त्रप्रभञ्जनः ॥६७५॥
मुण्डो विरूपो विक्रान्तो दण्डी दांतो गुणोत्तमः ॥६८
पिङ्गलाक्षो जनाध्यक्षो नीलग्रीवो निरामयः ॥६८५॥
सहस्रबाहुः सर्वेशः शरण्यः सर्वलोकधृक् ।
पद्मासनः परंज्योतिः परंपारः परंफलम् ॥६९३॥
पद्मगर्भो महागर्भो विश्वगर्भो विचक्षणः ।
चराचरज्ञो वरदो वरेशस्तु महाबलः ॥७०१॥
देवासुरगुरुर्देवो देवासुरमहाश्रयः ।
देवादिदेवो देवाग्निर्देवाग्नि सुखदः प्रभुः ॥७०६॥
देवासुरेश्वरो दिव्यो देवासुरमहेश्वरः ।
देवदेवमयोऽचिंत्यो देवदेवात्मसम्भवः ॥७१२॥
सद्योनिरसुरव्याघ्रो देवसिंहो दिवाकरः ।
विबुधाग्रवरश्रेष्ठः सर्वदेवोत्तमोत्तमः ॥७१८॥
शिवज्ञानरतः श्रीमाञ्छिखि श्रीपर्वतप्रियः ।
वज्रहस्तः सिद्धिखड्गी नरसिंहनिपातनः ॥७२४॥
ब्रह्मचारी लोकचारी धर्मचारी धनाधिपः ।
नन्दी नन्दीश्वरोऽनन्तो नग्नव्रतधरः शुचिः ॥७३३॥
लिंगाध्यक्षः सुराध्यक्षो योगाध्यक्षो युगावहः ।
स्वधर्मा स्वर्गतः स्वर्गस्वरः स्वरमयस्वनः ॥७४१॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बाणाध्यक्षो बीजकर्ता धर्मकृद्धर्म संभवः ।
दंभोऽलोभोऽर्थविच्छंभुः सर्वभूतमहेश्वरः ॥७४८॥

श्मशाननिलयः त्र्यक्षः सेतुरप्रतिमाकृतिः ।
लोकोत्तर स्फुटालोकः त्र्यवंको नागभूषणः ॥७५५॥

अंधकारिर्मखद्वेषी विष्णुकंधरपातनः ।
हीनदोषोऽक्षयगुणो दक्षारिः पूषदंतभित् ॥७६२॥

धूर्जटिः खंडपरशुः सकलोनिष्कलोऽनघः ।
अकालः सकलाधारः पांडुराभो मृडोनटः ॥७७२॥

पूर्णः पूरयितापुण्यः सुकुमारः सुलोचनः ।
सामगेयप्रियोऽक्रूरः पुण्यकीर्तिरनामयः ॥७८१॥

मनोजव स्तीर्थकरो जटिलोजीवितेश्वरः ।
जीवितांतकरो नित्यो वसुरेता वसुप्रदः ॥७८८॥

सद्गतिः सत्कृतिः सिद्धिः सज्जातिः कालकंटकः ।
कलाधरो महाकालो भूतसत्यपरायणः ॥७९६॥

लोकलावण्यकर्त्ता च लोकोत्तर सुखालयः ।
चन्द्रसंजीवनः शास्ता लोकगूढो महाधिपः ॥८०२॥

लोकबंधु र्लोकनाथः कृतज्ञः कीर्तिभूषणः ।
अनपायोऽक्षरः कांतः सर्वशस्त्रभृतांवरः ॥८०९॥

तेजोमयो द्युतिधरो लोकानामग्रणीरणुः ॥८१२॥

शुचिस्मितः प्रसन्नात्मा दुर्जेयो दुरतिक्रमः ॥८१६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्योतिर्मयो जगन्नाथो निराकारो जलेश्वरः ॥८२०॥
तुंबवीणो महाकोपो विशोकः शोकनाशनः ॥८२४॥
त्रिलोकपस्त्रिलोकेशः सर्वशुद्धिरधोक्षजः ।
अव्यक्तलक्षणो देवो व्यक्ताव्यक्तो विशांपतिः ॥८३१॥
वरशीलो वरगुणः सारोमान धनोमयः ।
ब्रह्माविष्णुः प्रजापालो हंसो हंसगतिर्वयः ॥८४०॥
वेधाविधाता धाता च स्रष्टा हर्त्ता चतुर्मुखः ।
कैलासशिखरावासी सर्वावासी सदागतिः ॥८४७॥
हिरण्यगर्भो दुहिणो भूतपालोऽथ भूपतिः ॥८५१॥
सद्योगी योगविद्योगी वरदो ब्राह्मणप्रियः ॥८५५॥
देवप्रियो देवनाथो देवज्ञो देवचिंतकः ।
विपमाक्षो विशालाक्षो वृषदो वृषवर्धनः ॥८६२॥
निर्ममो निरहङ्कारो निर्मोहो निरुपद्रवः ।
दर्पहा दर्पदो दृप्तः सर्वतुपविवर्तकः ॥८६९॥
सहस्रजित्सहस्रार्चिः स्निग्धप्रकृतिदक्षिणः ॥८७२॥
भूतभव्यभवन्नाथः प्रभवो भूतिनाशनः ॥८७५॥
अर्थोऽनर्थो महाकोश परकार्यैकपंडितः ।
निष्कंटकः कृतानंदो निर्व्याजो व्याजमर्दनः ॥८८२॥
सत्ववान्सात्विकः सत्यकीर्तिः स्नेहकृतागमः ।
अकंपितो गुणग्राही नैकात्मा नैककर्मकृत् ॥८८९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सुप्रीतः सुमुखः सूक्ष्मः सुकरो दक्षिणानिलः ।
नंदिस्कंधरो धुर्यः प्रकटः प्रीतिवर्धनः ॥८९८॥
अपराजितः सर्वसत्त्वो गोविंदः सत्त्ववाहनः ॥९०२॥
अधृतः स्वधृतः सिद्धः पूतमूर्तिर्यशोधनः ॥९७७॥
वाराहशृङ्गधृक्छृंगी बलवानेकनायकः ॥९१०॥
श्रुतिप्रकाशः श्रुतिमानेकबंधुरनेककृत् ॥९१४॥
श्रीवत्सल शिवारंभः शांतभद्रः समोयशः ।
भूशयो भूषणो भूतिर्भूतकृद्भूतभावनः ॥९२२॥
अकंपो भक्तिकायस्तु कालहा नीललोहितः ।
सत्यव्रत महात्यागी नित्यशांतिपरायणः ॥९२८॥
परार्थवृत्तिर्वरदो विविक्तस्तु विशारदः ॥९३१॥
शुभदः शुभकर्त्ता च शुभनामा शुभः स्वयम् ॥९३४॥
अनर्थितोऽगुणः साक्षी ह्यकर्त्ता कनकप्रभः ॥९३८॥
स्वभावभद्रो मध्यस्थः शीघ्रगः शीघ्रनाशनः ॥९४२॥
शिखंडी कवचीशूली जटी मुण्डी च कुन्डली ।
अमृत्युः सर्वदृक्सिंह स्तेजोराशिर्महामणिः ॥९४७॥
असंख्येयोऽप्रमेयात्मा वीर्यवान्वीर्यकोविदः ।
वेद्यश्चैव वियोगात्मा परावरमुनीश्वरः ॥९५२॥
अनुत्तमो दुराधर्षो मधुरप्रियदर्शनः ।
सुरेशः शरणसर्वः शब्द ब्रह्म सतांगतिः ॥९५८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कालपक्षः कालकारी कंकणीकृतवासुकिः ॥९६१॥
महेश्वासो महीभर्ता निष्कलङ्को विशृङ्खलः ॥९६५॥
द्युमणिस्तरणिर्धन्यः सिद्धिदः सिद्धिसाधनः ।
विश्वतः संवृतः स्तुत्यो व्यूढोरस्कोमहाभुजः ॥९७२॥
सर्वयोनिर्निरातंको नरनारायणप्रियः ।
निर्लेपो निष्प्रपञ्चात्मा निर्व्यंगो व्यङ्गनाशनः ॥९७८॥
स्तव्यः स्तवप्रियः स्तोता व्यासमूर्तिर्निरंकुशः ।
निरवद्यमयोपायो विद्याराशी रसप्रियः ॥९८६॥
प्रशान्तबुद्धिरक्षुण्णः संग्रही नित्यसुन्दरः ॥९९०॥
वैयाघ्रधुर्यो धात्रीशः शाकल्यः शर्वरीपतिः ॥९९४॥
परमार्थगुरुर्दृष्टिः शरीराश्रितवत्सलः ।
सोमो रसज्ञो रसदः सर्वसत्त्वावलंबनः ॥१०००॥

शिवनाम सहस्रन्तु यः पठेद्भक्ति संयुतः ।
सर्वभोगी गुणाध्यक्षो भूत्वा शिवपदमियात् ॥

इति श्रीशिवसहस्रनाम स्तोत्रं संपूर्णम् ।

ॐ श्रीसदाशिवार्पणमस्तु ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गायत्री पुरश्चरणप्रयोगः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पुस्तक मिलने का पताः—
रायबहादुर ला० देवीप्रसादजी रईस,
मुज़फ्फ़रनगर, यू० पी० ।

मुद्रितः—
स्वतन्त्र प्रेस, लिमिटेड,
मुज़फ्फ़रनगर ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri